# विशिष्टाः कार्यक्रमाः

I. मुक्तस्वाध्यायपीठेन 11-1-2923 तः 20-1-2023 पर्यन्तम् **अन्ताराष्ट्रियः संस्कृत-शिक्षक-प्रशिक्षणवर्गः** समायोजितः यत्र दुबै-बह्रैन्-अबुधाबि-दुबै-कुवैत्-ओमन्-सौदी-अरेबिया-शार्जाह्-इण्डोनेशिया-प्रभृतिषु देशेषु कार्यरताः 39 सङ्ख्याकाः जिज्ञासवः संस्कृतशिक्षकप्रशिक्षणं प्राप्तवन्तः । वर्गस्यास्य उद्घाटनसत्रं केन्द्रीय-संस्कृत-विश्वविद्यालयस्य कुलपतेः आचार्यस्य श्रीनिवासवरखेडी महोदयस्य आध्यक्ष्ये, संस्कृतभारत्याः विश्वविभागप्रमुखस्य डा. पी. नन्दकुमारस्य मुख्यातिथित्वे, दुबै-देशे भारतीयदूतावासे कार्यरतायाः श्रीमती ताडु मामु (Consul – Press, Culture & Info) इत्यस्याः विशिष्टातिथित्वे सम्पन्नम् । मुक्तस्वाध्यायपीठस्य निदेशकस्य डा. रत्नमोहनझावर्यस्य प्रास्ताविकवचनेन समारब्धे अस्मिन् प्रशिक्षणवर्गे डा. एच्. आर्. विश्वासः, आचार्यः वै.एस्. रमेशः, श्रीबालसुब्रह्मण्यः, डा. विश्वजित् प्रामाणिकः इत्येते उदबोधयन् ।




अन्ताराष्ट्रियः शिक्षकप्रशिक्षणवर्गः
(11-1-2023 तः 20-1-2023)
अन्तर्जालमाध्यमेन

भागग्राहिणां सूची

| # | Name | Country | Sambhashana shibiram | SB Patralaya | Day 1 | Day 2 | Day 3 |
|---|---|---|---|---|---|---|---|
| 1 | Balasubramanian Ananthararaman | Dubai | sambhashana shibira chalaka: | Kovida | Y | Y | Y |
| 2 | Bindu Thekkadavan Veedu | Dubai | sambhashana shibira chalaka: | Kovida | Y | Y | Y |
| 3 | Litty Prasad | Bahrain | sambhashana shibira chalaka: | Kovida | Y | Y | Y |
| 4 | Mini Sukumaran Nair | AbuDhabi | sambhashana shibira chalaka: | Kovida | Y | Y | Y |
| 5 | Neetha Muraleedharan | Dubai | sambhashana shibira chalaka: | Kovida | Y | Y | Y |
| 6 | Nimmi Krishnakumar | Kuwait | sambhashana shibira chalaka: | Kovida | Y | Y | Y |
| 7 | Preeti Rajpolkar | Kuwait | sambhashana shibira chalaka: | Kovida | Y | Y | Y |
| 8 | E PADMA | Oman | sambhashana shibira chalaka: | Kovida | Y | Y | Y |
| 9 | Rajeshwari Badiger | Kuwait | sambhashana shibira chalaka: | Kovida | Y | Y | Y |
| 10 | Seetha Laxmi | Oman | sambhashana shibira chalaka: | Kovida | Y | Y | Y |
| 11 | SUBIMON KRISHNANKUTTY KAIMAL | Kuwait | sambhashana shibira chalaka: | Kovida | Y | Y | Y |
| 12 | Suchithra Viswajith | Dubai | sambhashana shibira chalaka: | Kovida | Y | Y | Y |
| 13 | Suganthe Shreedhar | AbuDhabi | sambhashana shibira chalaka: | Kovida | Y | Y | Y |
| 14 | Sumana Naik | Saudi Arabia | sambhashana shibira chalaka: | Kovida | Y | Y | Y |
| 15 | Jolie Khandun | Dubai | sambhashana shibira chalaka: | Kovida | Y | Y | Y |
| 16 | Vidya Seshan | Dubai | sambhashana shibira chalaka: | Kovida | Y | Y |  |
| 17 | Beena Manoharan | Sharjah | sambhashana shibira chalaka: | Shiksha | Y | Y | Y |
| 18 | SAJITHA K K | Kuwait | sambhashana shibira chalaka: | Kovida | Y | Y | Y |
| 19 | Sudheer KP | Kuwait | sambhashana shibira chalaka: | Kovida | Y | Y | Y |
| 20 | Sumitra Ramachandran | Dubai | sambhashana shibira chalaka: | Kovida | Y | Y | Y |
| 21 | Meena Letchumanan | AbuDhabi | Shibirachalana Prashikshita: | Kovida | Y | Y | Y |
| 22 | Meena Maruvada | AbuDhabi | Shibirachalana Prashikshita: | Kovida | Y | Y | Y |
| 23 | Parvathy N V | Dubai | Shibirachalana Prashikshita: | Kovida | Y | Y | Y |
| 24 | Shaila Gururaj Prabhu | Sharjah | Shibirachalana Prashikshita: | Kovida | Y | Y | Y |
| 25 | Sheela Avinash Mali | Saudi Arabia | Shibirachalana Prashikshita: | Kovida | Y | Y | Y |
| 26 | SINI PRABHAKARA KURUP | Dubai | Shibirachalana Prashikshita: | Kovida | Y | Y | Y |
| 27 | Padma Narayan | Oman | Shibirachalana Prashikshita: | Shiksha |  | Y | Y |
| 28 | Santa Devadiga | Sharjah | Shibirachalana Prashikshita: | Shiksha | Y | Y |  |
| 29 | Sasirekha Sivakumar | Saudi Arabia | Shibirachalana Prashikshita: | Shiksha |  | Y | Y |
| 30 | Divya Nayak VinayKumar Samant | Oman | Shibirachalana Prashikshita: | Parichaya | Y |  | Y |
| 31 | Indu Prabhakaran | Saudi Arabia | Shibirachalana Prashikshita: | Parichaya | Y | Y | Y |
| 32 | Mini Narayanan | Saudi Arabia | Shibirachalana Prashikshita: | Parichaya | Y | Y | Y |
| 33 | Prabha Sethuraman | Saudi Arabia | Shibirachalana Prashikshita: | Pravesha | Y | Y | Y |
| 34 | Mamatha Mohanan | Bahrain | Shibirachalana Prashikshita: | Kovida | Y | Y | Y |
| 35 | Preetha Nataraj | Saudi Arabia | Shibirachalana Prashikshita: | Pravesha | Y | Y | Y |
| 36 | Seema Prashant | Saudi Arabia |  | Pravesha | Y | Y | Y |
| 37 | Dewa Ayu Komang Sri Purnamiasi | Indonesia |  |  | Y | Y | Y |
| 38 | Ni Ketut Jubanita | Indonesia |  |  | Y | Y | Y |
| 39 | Ni Luh Suchintia | Indonesia |  |  | Y | Y | Y |

II. मुक्तस्वाध्यायपीठस्य शैक्षिकविकासकेन्द्रे नवनियुक्तानां स्वागतसत्रं कार्योन्मुखीकरण-वर्गश्च (१७-०२-२०२३ तः ०२-०३-२०२३ पर्यन्तम्) प्रावर्तत ।






परिसरनिदेशकः आचार्यः सि.एस्.एस्.नरसिंहमूर्तिवर्यः कार्योन्मुखीकरणवर्गे नवनियुक्तान् शैक्षिकसदस्यान् उदबोधयत् ।



मुक्तस्वाध्यायपीठस्य निदेशकः डा. रत्नमोहनझावर्यः कार्योन्मुखीकरणवर्गे देहलीतः अन्तर्जालद्वारा सर्वान् उद्दिश्य सम्प्रेरणाभाषणम् अकरोत्।

कू. वेङ्कटेशमूर्तिः (सहायकाचार्यः, मु.स्वा.पी.) कार्योन्मुखीकरणवर्गे प्रास्ताविकं वचनमब्रवीत्। पश्चात् अग्रिमेषु सत्रेषु कार्ययोजनां परिचाय्य अभिनवपाठ्यक्रमसरण्याः निमित्तं सिद्धतायै प्रैरयत्।



२४-०२-२०२३ दिनाङ्के तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिचरः आचार्यः मिगनकल्लु लक्ष्मीनरसिंहमूर्तिमहोदयः सन्तुलितजीवनशैली समचित्ततया च कार्यकरणं च साफल्यस्य मूलमिति समुपादिशत्। पारम्परिकज्ञानसंरक्षणाय अध्यापकाः प्रयतेरन्निति च उदबोधयत्। सर्वान् उद्दिश्य कार्योन्मुखीकरणानि कानिचन उपदेशवाक्यानि अवोचत्।

III. **कौशलविकासकार्यक्रमः**

कौशलविकासकार्यक्रमाङ्गत्वेन मुक्तस्वाध्यायपीठस्य आन्तरिकगुणवत्ताश्वासनकेन्द्रेण एकादशदिनात्मिका पद्यरचनाकार्यशाला प्रवर्तिता यत्र प्रथमस्तरीयाणां कृते **पद्यरचनाप्रवर्तिनी** इति, प्रगतस्तरीयाणां कृते **पद्यरचनाप्रवर्धिनी** इति च गणं प्रकल्प्य छात्राः बोध्यन्ते ।। 10-4-2023तमे दिनाङ्के परिसरनिदेशकेन आचार्येण सि. एस्.एस्. एन्. मूर्तिमहोदयेन समुद्घाटिते अस्मिन् कौशलप्रबोधनवर्गे (गणद्वये आहत्य) 90 छात्राः अभ्यस्यन्ति । शैक्षिकविकासकेन्द्रस्य युवानौ विद्वांसौ उमामहेश्वर-देवाङ्गभट्टौ अध्यापयतः । विशिष्टोद्बोधकत्वेन कविवरौ गणेश-ईश्वरभट्ट-राघवेन्द्रभट्टौ समाहूतौ । डा. जगदीशभट्टः कार्यशालायाः अस्याः संयोजनदायित्वं निर्वहति ।




GPS Map Camera
Chikkamagaluru,KA,India
SH 27, Sringeri, Chikkamagaluru, 577139, KA,
India
Lat 13.417620, Long 75.272125
04/10/2023 05:12 PM GMT+05:30
Note : Captured by GPS Map Camera


GPS Map Camera
stay
27
Google
Menase, Karnataka, India
Rajeev Gandhi Campus College Stop, Sringeri,
Karnataka 577139, India
Lat 13.417735°
Long 75.272441°
12/04/23 05:58 PM GMT +05:30




पद्यरचनाकौशलवर्धनाय शैक्षिकविकासकेन्द्रेण १०-०४-२०२३ तः आयोजितायाः पद्यरचनाकौशलवर्धिनीकार्यशालायाः दृश्यावलिः ।

## IV. कार्यालयकर्मचारिणां संस्कृतशिक्षणवर्गः






परिसरीय-कार्यालयीयकर्मचारिणां, सुरक्षाकर्मचारिणां, स्वच्छताकर्मचारिणां च संस्कृतसम्भाषणशिक्षणाय मुक्तस्वाध्यायपीठस्य शैक्षिकविकासकेन्द्रेण आयोजिते वर्गे श्रीमान् किरणभट्टः, कु. मयूरी च अपाठयताम् ।

## V. समाजोन्मुखिनः कार्यक्रमाः

मुक्तस्वाध्यायपीठस्य सामाजिकसम्बन्धस्थापन-सामाजिकशिक्षण-इतरसंस्थासम्पर्क-पूरकगणनिर्माणाद्युद्देशेन कतिचन समाजोन्मुखिनः कार्यक्रमाः आयोजिताः । यथा –

(क) मुक्तस्वाध्यायपीठस्य अध्यापकौ श्रीमन्तौ राहुलराजशेखरभट्ट-अनन्तकृष्णौ हरिहरपुरस्थं प्रबोधिनीगुरुकुलं गत्वा मुक्तस्वाध्यायपीठस्य पाठ्यक्रमाणां परिचयं कारितवन्तौ । तत्रत्यैः सह मुक्तस्वाध्यायपीठस्य सम्बन्धवर्धनदृष्ट्या विचारः प्रस्तुतः। गुरुकुलच्छात्राः प्राध्यापकाः च भाविनि काले प्रगतशिक्षणार्थं मुक्तस्वाध्यायपीठस्य पाठ्यक्रमेषु प्रविशेयुरिति आशयः प्रकटितः ।



(ख) संस्कृतबालमोदिनीवर्गः




शृङ्गेरीनगरे विद्यमाने BGS दर्शनी-संयुक्त-विद्यालये ऐषमः एप्रिल-मासस्य ३ दिनाङ्कतः १५ दिनाङ्कपर्यन्तं ग्रीष्मकालीनवर्गे संस्कृतमोदिनीवर्गः प्राचलत् । तत्र मुक्तस्वाध्यायपीठस्य पाठ्यक्रमाणां निमित्तं पूरकगणनिर्माणदृष्ट्या भाषाशिक्षकाभ्यां किरणगिरीशाभ्यां संस्कृतभाषारुच्युत्पादनाय आकर्षकपाठ्यक्रमः प्राचाल्यत । वर्गेऽस्मिन् ४५ छात्राः भागग्रहणम् अकुर्वन्। प्रतिदिनं प्रातः सार्धनववादनतः आरभ्य सार्धदशवादनपर्यन्तं संस्कृतकक्ष्या प्राचलत् ।

**उपयुक्तकार्यक्रमस्य परिणामः –** यस्मिन् विद्यालये बहुभ्यः वर्षेभ्यः प्रयत्नेनाऽपि पाठ्यक्रमे संस्कृतस्य प्रवेशः नासीत्, तत्र अनेन कार्यक्रमेण प्रभाविताः संस्कृतं पाठ्यक्रमे योजयितुं तत्रत्यप्रबन्धकाः सङ्कल्पं कृतवन्तः । न केवलम् तत्रत्यच्छात्राः मुक्तस्वाध्यायपीठस्य प्राक्शास्त्र्यादिपाठ्यक्रमेषु प्रविशेयुरिति बलवती सम्भावना वर्तते । अपि च तत्रत्याः कर्मचारिणः, अध्यापकाः, अधिकारिणश्च दूरस्थशिक्षामाध्यमेन संस्कृतपठनेच्छां प्राकटयन् ।

VI. मुक्तस्वाध्यायपीठस्य शैक्षिकविकासकेन्द्रं प्रति समागत्य अनुगृहीतवन्तः

## विशिष्टाः सन्दर्शकाः

1. श्रीमती गीता-रामचन्द्रन् (economist from USA)





०३-०३-२०२३ दिनाङ्के भारताभिजना, सम्प्रति अमेरिकादेशवासिनी अर्थशास्त्रनिपुणा श्रीमती गीता-रामचन्द्रमहोदया मुक्तस्वाध्यायपीठस्य शैक्षिकविकासकेन्द्रं समायाता । भारतामेरिकादेशयोः वसतां संस्कृताध्ययनविषयिणीं प्रवृत्तिम्, मुक्तस्वाध्यायपीठे संस्कृताध्ययनाय उपलब्धव्यवस्थां च अधिकृत्य

परिचर्चा समभूत् । अस्माकं सार्वजनीनं पाठ्यक्रमं श्रुत्वा अत्र प्रवेशं कामयमाना, तत्र अमेरिकादेशे अन्यान् अपि अध्ययनाय प्रेरयिष्यामि इति अब्रवीत्।

2. के.जि.महेशः




२८-०२-२०२३ दिनाङ्के विजयपुरसैनिकविद्यालयस्य संस्कृताध्यापकः के.जि.महेशवर्यः मुक्तस्वाध्यायपीठस्य शैक्षिकविकासकेन्द्रं समागतः। सर्वान् उद्दिश्य स्वविद्यालस्य संस्कृतवातावरणं व्यवृणोत् । तत्रत्यानां छात्राणां कृते अस्माकं मुक्तस्वाध्यायपीठस्य पाठ्यक्रमः कथम् उपयोगाय भवति, तथा तेषाम् अत्र प्रवेशः कथङ्कारेण भवितुमर्हति इत्यादिविषयाः तेन सह चर्चिताः।

## VII. शैक्षिकविकासकेन्द्रस्य सदस्यानां विशिष्टाः उपलब्धयः



- १२-०४-२०२३तमे दिनाङ्के हरिहरपुरस्थे प्रबोधिनीगुरुकुले परीक्षकत्वेन अनन्तकृष्णः तथा राहुलराजशेखरभट्टश्च समाहूतौ ।

........................................................................................




- श्रीमान् राहुलराजशेखरभट्टः कर्णाटकसंस्कृतविश्वविद्यालयेन वेदविज्ञानशोधसंस्थानेन च आयोजिते आंशकालिके आन्तर्जालिकाध्ययनसत्रे लघुवासुदेवमननम् इति ग्रन्थम् आध्यापयत् । (21-23 मार्च्, 2023)

..............................................................



- काश्यां 25-3-2023तमे दिनाङ्के सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य संस्थापनादिवसस्य अङ्गत्वेन आयोजिते कार्यक्रमे अष्टावधानं प्रास्तौत्, कविगोष्ठ्यां च भागमग्रहीत् डा. उमामहेश्वरः ।




मङ्गलूरुनगरे श्रीनिवासविश्वविद्यालयेन समायोजिते विश्वसंस्कृतसम्मेलने (26-2-2023 तमे दिनाङ्के) डा.उमामहेश्वरः संस्कृतस्य वाक्यशैलीनां विषये शोधलेखं प्रस्तुत्य उत्तमपत्रप्रस्तोतृत्वेन द्वितीयं स्थानम् अलभत ।




- हैदराबादस्थे भारतीय-प्रौद्योगिकीसंस्थाने समायोजिते भारतीयज्ञानपरम्पराविषयिण्यां, अनौपचारिकसंस्कृतशिक्षणविषयिण्यां च सङ्गोष्ठ्यां कू.वेङ्कटेशमूर्तिः आहूतोद्बोधकत्वेन संस्कृतस्य प्रासङ्गिकतामुद्दिश्य प्रस्तुतिमकरोत् ।